SINDHI HIGH SCHOOL , BENGALURU.

ANNUAL EXAMINATION - 2022-23

Class: 7ABCD
Marks: 30
No of Printed Sides:07

Subject: संस्कृतम्
Time: 8.00am to 9.10.am
Date: 31/03/2022

NAME -

ROLL NO -

## खण्डः – क - पठित – अवबोधनम्

### 1. अधोलिखितम् गद्यांशम् पठित्वा प्रश्नानाम् उत्तराणि लिखत -

गङ्गा भारतस्य सर्वासु नदीषु पवित्रतमा अस्ति। इयं हिमालयस्य गङ्गोत्री स्थानात् निर्गच्छति। पर्वतस्य प्रान्तेभ्यः निःसृत्य गङ्गा हरिद्वार नामके स्थाने भूतलम् स्पृशति। हरिद्वारातीर्थे प्रतिवर्षं लक्षाशः जनाः आयान्ति। तत्र गङ्गायाः शीतलम् निर्मलं जलम् अस्ति। गङ्गायाः उत्पतिविषये इयं कथां प्रचलिता अस्ति। पुरा भागीरथः नाम नृपः स्वपूर्वजानाम् उद्धाराय तपस्याम् अकरोत्। तपस्ययाः प्रभावेण गङ्गा स्वर्गात् भूतलं अवतीर्णा जाता। अत एव इयं गङ्गा भागीरथी इत्यपि कथ्यते। प्रारम्भे अस्याः स्रोतः लघु भवति, पश्चात् अनेकनिर्झराः अस्याम् नद्याम् आमिलन्ति। यैः गङ्गायाः जलप्रवाहः तीव्रः भवति। गङ्गायाः तटे हृषीकेशः, हरिद्वारम्, प्रयागः, वाराणासि च एतानि तीर्थस्थानानि सन्ति।

**(क) एकपदेन उत्तरत –** **(½x2=1)**

१) नदीषु पवित्रतमा नदी का अस्ति ? ________________________

२)भागीरथः केषाम् उद्धाराय तपस्याम् अकरोत्? ________________________

(ख) पूर्णवाक्येन उत्तरत - (1x3=3)

१) गङ्गायाः तटे स्थितानि प्रधानानि तीर्थानि कानि ?

______________________________________________

______________________________________________

२) गङ्गा कुतः निर्गच्छति?

______________________________________________

३) इयं गङ्गा ____________________ कथ्यते । (वाक्यं पूरयत)

**खण्डः – ख - व्याकरणम्**

**2. संस्कृतभाषायाम् अनुवादम् कुरुत -** **(1x4=4)**

१) He is eating fruit.

______________________________________________

२) We both are going to the school.

______________________________________________

३) Boys are playing in the playground.

______________________________________________

४) Boys are running.

_______________________________

**3. उचितधातु पदैः रिक्तस्थानानि पूरयत -** **(½x4=2)**

१) ताः कन्याः पाठम् ______________ (अपठत्, अपठन्, अपठताम्, )

२) पुरा दशरथः नाम राजा ______________ (अस्ति, आस्ताम्, आसीत्)

३) अहम् फलरसम् ______________ (अपिबम्, अपिबताम्, अपिबाव, )

४) तौ बालौ शालाम् ______________ (अगच्छत्, अगच्छताम्, अगच्छन्, )

**4. समानार्थकपदानि चित्वा लिखत ।** **(½x4=2)**

( पत्नी, तुलसी, समुद्रः, सलिलम्, सरिता )

१) सागरः ______________ २) भार्या ______________

३) नदी ______________ ४) जलम् ______________

**5. प्रकृति प्रत्ययानाम् मेलनं कुरुथ -** **(½x4=2)**

१) नी+ क्त्वा = ______________

२) गम् + तुमुन् = ______________

३) प्र + नम् + ल्यप् = ______________

४) पठ् + तुमुन् = ______________

6. इतरवचनानि लिखत - (½x4=2)

| | | | |
|---|---|---|---|
| १ | नदी | | |
| २ | | | नदीः |
| ३ | कावेरी | | |
| ४ | | | नदीभिः |

7. विरुद्धपदानि चित्वा लिखत। (½x4=2)

(दूरम्, निकटम्, प्रातः, नास्ति, अधः, गच्छति)

१) अस्ति x ____________ २) समीपम् x ____________

३) उपरि x____________ ४) सायम्x____________

खण्डः – ग – रचनात्मकं कार्यम्

8. चित्रम् दृष्ट्वा चत्वारि वाक्यानि लिखत - (1x4=4)



[ मञ्जूषा - वृक्षाः, बालाः, जनाः, क्रीडन्ति, जलम् , समाचारपत्रम् ,वृद्धाः, कन्दुकः, कन्या, पठति,धावति ]

______________________________________________

______________________________________________

______________________________________________

______________________________________________

______________________________________________

______________________________________________

**9. अधोलिखितम् गद्यांशम् पठित्वा प्रश्नानाम् उत्तराणि लिखत :-**

व्यासमुनिः श्री नारायणस्य अंशेन अवातरत्। अस्य कृष्णः, कृष्णद्वैपायनः, पाराशर्यः, बादरायणः इति नामान्तराणि। अयं व्यासः वसिष्ठस्य नप्ता, शक्तेः पौत्रः, सत्यवती पराशरयोः पुत्रः शुकस्य पिता च।

व्यासम् वसिष्ठनप्तारम् शक्तेः पौत्रमकल्मषम्।
पराशरात्मजं वन्दे शुकतातम् तपोनिधम्॥

अयं व्यासः अनन्तवेदराशिम् ऋक्-यजुः-साम-अथर्व रूपेण चतुर्धा विभज्य वेदव्यासः इति प्रसिद्धः अभवत्। अयम् महाभारतस्य कर्ता। महाभारतम् पञ्चमोवेदः इति प्रथितः। महाभारतस्य "जय" इत्यपि नामान्तरम् विद्यते। व्यासमहर्षिणा अष्टादशपुराणानि च लिखितानि। "पुरापि नवम्" इति पुराणपदस्य निरुक्तिः पुराणेषु भागवतपुराणम् अत्यन्तम् उत्कृष्टम् भवति । ब्रह्मसूत्राणि, महाभारतम्,पुराणानि च रचयित्वा अपि वेदव्यासः मनश्शान्तिम् नालभत। अतः नारदोपदेशेन भागवतम् नाम महापुराणम् विलिख्य शान्तिमलभत ।

**(क) एकपदेन उत्तरत -** **(½x2=1)**

१. महाभारतस्य नामान्तरम् किम् ? ______________________

२. महाभारतस्य कर्ता कः? ______________________________

**२ पूर्णवाक्येन उत्तरत -** **(1x3=3)**

१. वेदव्यासः कदा शान्तिम् अलभत ?

______________________________

______________________________

२. व्यासेन रचिताः ग्रन्थाः के ?

______________________________

______________________________

३.महाभारतम् ______________________ इति प्रथितः।(वाक्यं पूरयत)

**10. अधोलिखितम् नाट्यांशम् पठित्वा प्रश्नानाम् उत्तराणि लिखत -**

पञ्चवर्षियोऽपि अयं बालः तपसे वनम् अगच्छत्। वनम् गच्छन्तम् इमं दृष्ट्वा देवर्षिः नारदः अपृच्छत् "वत्स,त्वम् कुत्र गच्छसि?

बालकः -- भगवन् तपसे वनम् गच्छामि। तपसा भगवन्तम् तोषयित्वा पितुरङ्कम् लप्स्ये।

नारदः -- वत्स, कठिनं तपः चरितुम् नायं कालस्तव । त्वं गृहं गच्छ । विहारैः मनः विनोदाय , उचिते काले भगवन्तम् तोषयितुम् यतेथाः।

बालकः --- विमातुः वचनेन कलुषिते मनसि भवतः उपदेशःपदं न करोमि । मम निश्चयः दृढः । अतः मामनुगृह्य तपोमार्गमुपदिशतु भवान्।

नारदः --- (मनसा तमभिनन्दम् अवदत्) बाल गच्छ मधुवनम् यत्र नित्यम् सन्निहितः हरिः । तत्रैव भगवन्तमाराधय । अचिरात् सः ते अभीष्टं प्रदास्यति।

ध्रुवः तपः कर्तुम् आरभत । षट् मासाः व्यतीताः । बालस्य कठिनया तपसा भीताः देवाः हरिमुपागच्छन् । ते तं तपसा निवर्तयितुम् हरिं अप्रार्थयन्। भगवान् विष्णुः बालस्य पुरतः आविरभवत् । तं पाणिना अस्पृशत् । ध्रुवस्तदा भगवतः पादयोः निपत्य स्तुतिमकरोत्।

**(क) एकपदेन उत्तरत :-** **(½x2=1)**

१ देवर्षिः कः ? ______________________________

२ ध्रुवः कति मासात् तपः आचरत्। ______________________________

**(ख) पूर्णवाक्येन उत्तरत -** **(1x3=3)**

१) बालकध्रुवस्य वचनम् श्रुत्वा नारदः किम् अवदत्?

______________________________

______________________________

२) देवाः किमर्थम् हरेः समीपम् अगच्छन् ?

______________________________

______________________________

३) मधुवनम् गच्छ यत्र ______________________________।
(वाक्यं पूरयत)

************************शुभमस्तु ************************